## ओं खं ब्रह्म । खं पुराणं वायुरं खमिति ह स्माह कौरव्यायणीपुत्रो वेदोऽयं ब्राह्मणा विदुर्वेदैनेन यद्वेदितव्यम् ॥ १ ॥

ओं खं ब्रह्म इति मन्त्रः ; अयं च अन्यत्र अविनियुक्तः इह ब्राह्मणेन ध्यानकर्मणि विनियुज्यते । अत्र च ब्रह्मेति विशेष्याभिधानम् , खमिति विशेषणम् । विशेषणविशेष्ययोश्च सामानाधिकरण्येन निर्देशः नीलोत्पलवत् — खं ब्रह्मेति ब्रह्मशब्दो बृहद्वस्तुमात्रास्पदः अविशेषितः, अतः विशेष्यते — खं ब्रह्मेति ; यत्तत् खं ब्रह्म, तत् ओंशब्दवाच्यम् , ओंशब्दस्वरूपमेव वा ; उभयथापि सामानाधिकरण्यम् अविरुद्धम् । इह च ब्रह्मोपासनसाधनत्वार्थम् ओंशब्दः प्रयुक्तः, तथा च श्रुत्यन्तरात् 'एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्' (क. उ. १ । २ । १७) 'ओमित्यात्मानं युञ्जीत' (तै. ना. २४ । १) 'ओमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत' (प्र. उ. ५ । ५) 'ओमित्येवं ध्यायथ आत्मानम्' (मु. उ. २ । २ । ६) इत्यादेः । अन्यार्थासम्भवाच्च उपदेशस्य । यथा अन्यत्र 'ओमिति शंसति ओमित्युद्गायति' (छा. उ. १ । १ । ९) इत्येवमादौ स्वाध्यायारम्भापवर्गयोश्च ओङ्कारप्रयोगः विनियोगादवगम्यते, न च तथा अर्थान्तरम् इह अवगम्यते । तस्मात् ध्यानसाधनत्वेनैव इह ओङ्कारशब्दस्य उपदेशः । यद्यपि ब्रह्मात्मादिशब्दा ब्रह्मणो वाचकाः, तथापि श्रुतिप्रामाण्यात् ब्रह्मणो नेदिष्ठमभिधानम् ओङ्कारः । अत एव ब्रह्मप्रतिपत्तौ इदं परं साधनम् । तच्च द्विप्रकारेण, प्रतीकत्वेन अभिधानत्वेन च । प्रतीकत्वेन — यथा विष्ण्वादिप्रतिमा अभेदेन, एवम् ओङ्कारः ब्रह्मेति प्रतिपत्तव्यः । तथा ह्योङ्कारालम्बनस्य ब्रह्म प्रसीदति,

‘एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् । एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते’ (क. उ. १ । २ । १७) इति श्रुतेः ॥

तत्र खमिति भौतिके खे प्रतीतिर्मा भूत् इत्याह — खं पुराणं चिरन्तनं खं परमात्माकाशमित्यर्थः । यत्तत्परमात्माकाशं पुराणं खम् , तत् चक्षुराद्यविषयत्वात् निरालम्बनम् अशक्यं ग्रहीतुमिति श्रद्धाभक्तिभ्यां भावविशेषेण च ओङ्कारे आवेशयति — यथा विष्णवङ्गाङ्कितायां शिलादिप्रतिमायां विष्णुं लोकः, एवम् । वायुरं खम् , वायुः अस्मिन्विद्यत इति वायुरम् , खं खमात्रं खमित्युच्यते, न पुराणं खम् — इत्येवम् आह स्म । कोऽसौ ? कौरव्यायणीपुत्रः । वायुरे हि खे मुख्यः खशब्दव्यवहारः ; तस्मान्मुख्ये संप्रत्ययो युक्त इति मन्यते । तत्र यदि पुराणं खं ब्रह्म निरुपाधिस्वरूपम् , यदि वा वायुरं खं सोपाधिकं ब्रह्म, सर्वथापि ओङ्कारः प्रतीकत्वेनैव प्रतिमावत् साधनत्वं प्रतिपद्यते, ‘एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः’ (प्र. उ. ५ । २) इति श्रुत्यन्तरात् । केवलं खशब्दार्थे विप्रतिपत्तिः । वेदोऽयम् ओङ्कारः, वेद विजानाति अनेन यद्वेदितव्यम् तस्माद्वेदः ओङ्कारः वाचकः अभिधानम् ; तेनाभिधानेन यद्वेदितव्यं ब्रह्म प्रकाश्यमानम् अभिधीयमानं वेद साधको विजानाति उपलभते, तस्मात् वेदोऽयमिति ब्राह्मणा विदुः ; तस्मात् ब्राह्मणानामभिधानत्वेन साधनत्वमभिप्रेतम् ओङ्कारस्य । अथवा वेदोऽयमित्यादि अर्थवादः ; कथम् ओङ्कारः ब्रह्मणः प्रतीकत्वेन विहितः ; ओं खं ब्रह्म इति सामानाधिकरण्यात् तस्य स्तुतिः इदानीं वेदत्वेन ; सर्वो हि अयं वेद ओङ्कार एव ; एतत्प्रभवः एतदात्मकः सर्वः ऋग्यजुःसामादिभेदभिन्नः एष ओङ्कारः, ‘तद्यथा शङ्कुना सर्वाणि पर्णानि’ (छा. उ. २ । २३ ।

३) इत्यादिश्रुत्यन्तरात् ; इतश्चायं वेदः ओङ्कारः, यद्वेदितव्यम् , तत्सर्वं वेदितव्यम् ओङ्कारेणैव वेद एनेन ; अतः अयमोङ्कारो वेदः ; इतरस्यापि वेदस्य वेदत्वम् अत एव ; तस्मात् विशिष्टोऽयमोङ्कारः साधनत्वेन प्रतिपत्तव्य इति । अथवा वेदः सः ; कोऽसौ ? यं ब्राह्मणा विदुः ओङ्कारम् ; ब्राह्मणानां हि असौ प्रणवोद्गीथादिविकल्पैर्विज्ञेयः ; तस्मिन्हि प्रयुज्यमाने साधनत्वेन सर्वो वेदः प्रयुक्तो भवतीति ॥

## *oṃ khaṃ brahma / khaṃ purāṇaṃ vāyuraṃ khamiti ha smāha kauravyāyaṇīputro vedo'yaṃ brāhmaṇā vidurvedainena yadveditavyam // 1 //*

*oṃ khaṃ brahma iti mantraḥ ; ayaṃ ca anyatra aviniyuktaḥ iha brāhmaṇena dhyānakarmaṇi viniyujyate / atra ca brahmeti viśeṣyābhidhānam , khamiti viśeṣaṇam / viśeṣaṇaviśeṣyayośca sāmānādhikaraṇyena nirdeśaḥ nīlotpalavat — khaṃ brahmeti brahmaśabdo bṛhadvastumātrāspadaḥ aviśeṣitaḥ, ataḥ viśeṣyate — khaṃ brahmeti ; yattat khaṃ brahma, tat oṃśabdavācyam , oṃśabdasvarūpameva vā ; ubhayathāpi sāmānādhikaraṇyam aviruddham / iha ca brahmopāsanasādhanatvārtham oṃśabdaḥ prayuktaḥ, tathā ca śrutyantarāt 'etadālambanaṃ śreṣṭhametadālambanaṃ param' (ka. u. 1 / 2 / 17) 'omityātmānaṃ yuñjīta' (tai. nā. 24 / 1) 'omityetenaivākṣareṇa paraṃ puruṣamabhidhyāyīta' (pra. u. 5 / 5) 'omityevaṃ dhyāyatha ātmānam' (mu. u. 2 /*

*2 / 6) ityādeḥ / anyārthāsambhavācca upadeśasya / yathā anyatra 'omiti śaṃsati omityudgāyati' (chā. u. 1 / 1 / 9) ityevamādau svādhyāyārambhāpavargayośca oṅkāraprayogaḥ viniyogādavagamyate, na ca tathā arthāntaram iha avagamyate / tasmāt dhyānasādhanatvenaiva iha oṅkāraśabdasya upadeśaḥ / yadyapi brahmātmādiśabdā brahmaṇo vācakāḥ, tathāpi śrutiprāmāṇyāt brahmaṇo nediṣṭhamabhidhānam oṅkāraḥ / ata eva brahmapratipattau idaṃ paraṃ sādhanam / tacca dviprakāreṇa, pratīkatvena abhidhānatvena ca / pratīkatvena — yathā viṣṇvādipratimā abhedena, evam oṅkāraḥ brahmeti pratipattavyaḥ / tathā hyoṅkārālambanasya brahma prasīdati, 'etadālambanaṃ śreṣṭhametadālambanaṃ param / etadālambanaṃ jñātvā brahmaloke mahīyate' (ka. u. 1 / 2 / 17) iti śruteḥ //*

*tatra khamiti bhautike khe pratītirmā bhūt ityāha — khaṃ purāṇaṃ cirantanaṃ khaṃ paramātmākāśamityarthaḥ / yattatparamātmākāśaṃ purāṇaṃ kham , tat cakṣurādyaviṣayatvāt nirālambanam aśakyaṃ grahītumiti śraddhābhaktibhyāṃ bhāvaviśeṣeṇa ca oṅkāre āveśayati — yathā viṣṇvaṅgāṅkitāyāṃ śilādipratimāyāṃ viṣṇuṃ lokaḥ, evam / vāyuraṃ kham , vāyuḥ asminvidyata iti vāyuram , khaṃ khamātraṃ khamityucyate, na purāṇaṃ kham — ityevam āha sma / ko'sau ? kauravyāyaṇīputraḥ / vāyure hi khe mukhyaḥ khaśabdavyavahāraḥ ; tasmānmukhye saṃpratyayo yukta iti manyate / tatra yadi purāṇaṃ khaṃ brahma nirupādhisvarūpam , yadi vā vāyuraṃ khaṃ sopādhikaṃ brahma, sarvathāpi*

*oṅkāraḥ pratīkatvenaiva pratimāvat sādhanatvaṃ pratipadyate, 'etadvai satyakāma paraṃ cāparaṃ ca brahma yadoṅkāraḥ' (pra. u. 5 / 2) iti śrutyantarāt / kevalaṃ khaśabdārthe vipratipattiḥ / vedo'yam oṅkāraḥ, veda vijānāti anena yadveditavyam tasmādvedaḥ oṅkāraḥ vācakaḥ abhidhānam ; tenābhidhānena yadveditavyaṃ brahma prakāśyamānam abhidhīyamānaṃ veda sādhako vijānāti upalabhate, tasmāt vedo'yamiti brāhmaṇā viduḥ ; tasmāt brāhmaṇānāmabhidhānatvena sādhanatvamabhipretam oṅkārasya / athavā vedo'yamityādi arthavādaḥ ; katham oṅkāraḥ brahmaṇaḥ pratīkatvena vihitaḥ ; oṃ khaṃ brahma iti sāmānādhikaraṇyāt tasya stutiḥ idānīṃ vedatvena ; sarvo hi ayaṃ veda oṅkāra eva ; etatprabhavaḥ etadātmakaḥ sarvaḥ ṛgyajuḥsāmādibhedabhinnaḥ eṣa oṅkāraḥ, 'tadyathā śaṅkunā sarvāṇi parṇāni' (chā. u. 2 / 23 / 3) ityādiśrutyantarāt ; itaścāyaṃ vedaḥ oṅkāraḥ, yadveditavyam , tatsarvaṃ veditavyam oṅkāreṇaiva veda enena ; ataḥ ayamoṅkāro vedaḥ ; itarasyāpi vedasya vedatvam ata eva ; tasmāt viśiṣṭo'yamoṅkāraḥ sādhanatvena pratipattavya iti / athavā vedaḥ saḥ ; ko'sau ? yaṃ brāhmaṇā viduḥ oṅkāram ; brāhmaṇānāṃ hi asau praṇavodgīthādivikalpairvijñeyaḥ ; tasminhi prayujyamāne sādhanatvena sarvo vedaḥ prayukto bhavatīti //*